Kerala Reader

# SANSKRIT

For Academic and Sanskrit Schools

# TEACHER TEXT

(Supplementary)

**STANDARD X**

केरळपाठावलिः

# संस्कृतम्

अक्कादमिक-संस्कृतविद्यालयानां कृते

## अध्यापकपुस्तकम्

(अनुबन्धः)

## दशमी कक्ष्या

Government of Kerala
Department of General Education

State Council of Educational Research and Training (SCERT), Kerala
2019

**State Council of Educational Research and Training (SCERT)**
Poojappura, Thiruvananthapuram 695012, Kerala.

# भूमिका

सार्वजनीनशिक्षासंरक्षणयज्ञद्वारा केरलीयविद्यालयेषु शैक्षणिकविषयेषु भौतिकविषयेषु च प्रगतिः साधिता अभवत्। कक्ष्याप्रकोष्ठाः अतिनूतनतन्त्रयुक्ताः संवृत्ताः। सार्वजनीनविद्यालयानां प्रगत्यै समाजः बद्धश्रद्धः इति च द्रष्टुं शक्यते।

प्रलयप्रभृतीनां प्रकृतिदुरन्तानां पश्चात्तले तन्निवारणप्रवर्तनानाम् अवबोधाय पाठान् प्रवर्तनानि च अन्तर्भाव्य पुस्तकानि परिष्कृतानि। अपि च राष्ट्रियकर्मनैपुणीपद्धतिम् (NSQF) अनुसृत्य कानिचन प्रवर्तनानि तथा जीवननैपुणीसंवर्धकानि प्रवर्तनानि च अन्तर्भावितानि।

पाठपुस्तके कृतानि ईषत्परिवर्तनानि अनुसृत्य अध्यापकपुस्तकेऽपि प्रवर्तनानि परिष्कृत्य अनुबन्धरूपेण दत्तानि। अधुना प्रचाल्यमानेन अध्यापकपुस्तकस्थेन विवरणेन व्याख्यानेन च सह एतम् अनुबन्धमपि पठित्वा प्रवर्तनानि आसूत्रणीयानि। पठनसहयोगार्थम् अधिकविभवान् 'समग्रा' जालपुटात् स्वीकृत्य परिष्कुर्वन्तु भवन्तः।

**डा.जे.प्रसाद्**

निदेशकः

राज्यशैक्षिकानुसन्धनप्रशिक्षणपरिषद्, केरळम्।

## विषयानुक्रमणिका


पुटसंख्या

**एककम् - I जीवनम्**

१ आयुरारोग्यसौख्यम्। -------------------- 5

२ दीनवत्सला जननी। -------------------- 6

३ मधुमान् नो वनस्पतिः। -------------------- 8

**एककम् - II पैतृकम्**

४ कनकधारा। -------------------- 9

५ जयन्ति ते सुकृतिनः। -------------------- 11

६ रागसुधारस.....। -------------------- 12

**एककम् - III साहिती**

७ काव्यमुक्तावलिः। -------------------- 13

८ शिवास्ते सन्तु पन्थानः। -------------------- 14

**एककम् - IV संस्कृतिः**

९ ईशोपदेशः। -------------------- 26

१० प्राप्य वरान् निबोधत। -------------------- 27

**वार्षिकासूत्रणम्** -------------------- 29

पाठः १

# आयुरारोग्यसौख्यम्।

## अधिकविस्तरः

**सुभाषितावलिः** (वैद्यकीयसुभाषितसाहित्यम्) आरोग्यसम्बन्धिनां सुभाषितानां समाहारः भवति वैद्यकीयसुभाषितसाहित्यम्। ग्रन्थेऽस्मिन् सुभाषितावलीतः उद्धृताः बहवः श्लोकास्सन्ति।

**चाणक्यनीतिः** अर्थशास्त्रम् इति राज्यतन्त्रग्रन्थस्य कर्त्रा कौटिल्यापराभिधानेन चाणक्येन विरचितः नीतिशास्त्रग्रन्थः भवति चाणक्यनीतिः।

धन्यानामुत्तमं ......... तुष्टिरुत्तमा।।
महाभारतस्य वनपर्वणि युधिष्ठिर-यक्षसंवादे युधिष्ठिरस्य वचनम् एतत्।

पाठः - २

# दीनवत्सला जननी।

## प्रवर्तनं- १

कार्षिकवृत्तेः आधुनीकरीतिं परम्परागतरीतिं चाधिकृत्य चर्चां कृत्वा टिप्पणीं लिखतु।चर्चासूचकाः

| | आधुनिकरीतिः | | परम्परागतरीतिः |
|---|---|---|---|
| १. | क्षेत्रकर्षणाय यन्त्राणि | १. | क्षेत्रकर्षणाय वृषभाः |
| २. | बीजवपनं, जलसेचनं, व्रीहीलवनं यन्त्रसाहाय्येन | २. | बीजवपनं, जलसेचनं, व्रीहीलवनं मनुष्यैः एव। |
| ३. | रासोर्वरकम् | ३. | जैवोर्वरकम् । |
| ४. | कीटनाशकानाम् अमितोपयोगः | ४. | जैवकृषिरीतिः। |

## प्रवर्तनं- २

**मातृवात्सल्यसम्बन्धिनीनां कथानां तत्कर्तॄणाञ्च नामानि समाहृत्य पट्टिकां करोतु।**

मातृवात्सल्यसम्बन्धिनीः कथाः भाषान्तरेभ्यः पाठान्तरेभ्यः वा समाहृत्य पट्टिका रचनीया।

**श्रद्धेयाः अंशाः**

**क)** चयनसामर्थ्यम् ।
**ख)** पट्टिकाकरणम्।
**ग)** अवतारणम्।

## अधिकविस्तरः

महाभारते अष्टादश पर्वाणि सन्ति। तेषु प्रतिपादितानां विषयाणां दिङ्मात्रपरिचयः-

| | | | |
|---|---|---|---|
| १. | आदिपर्व | - | महाभारतकथायाः आरम्भः। अस्मिन् पर्वणि शकुन्तलादुष्यन्तयोः उपाख्यानं द्रौपदीस्वयंवरश्च दृश्यते। |
| २. | सभापर्व | - | राजसूयारम्भः। जरासन्धनिग्रहः, शिशुपालवधः, पाण्डवानां वनगमनम्। |
| ३. | वनपर्व | - | पाण्डवान् हन्तुं दुर्योधनस्य आलोचना, अर्जुनस्य तीर्थयात्रा, भीमहनुमतोः दर्शनम्। |
| ४. | विराटपर्व | - | अज्ञातवासः, कीचकवधः, उत्तराभिमन्य्वोः विवाहः। |
| ५. | उद्योगपर्व | - | अर्जुनः कृष्णं सारथित्वेन प्रार्थयते। हस्तिनपुर्यां कृष्णस्य दौत्यम्। |
| ६. | भीष्मपर्व | - | गीतोपदेशः। पाण्डवानां कौरवाणां च अष्टादशदिनात्मकः युद्धः। |
| ७. | द्रोणपर्व | - | अभिमन्योः मरणम्। द्रोणाचार्यजयद्रथादीनां वधः। |
| ८. | कर्णपर्व | - | कर्णदुश्शासनयोः मरणम्। |
| ९. | शल्यपर्व | - | शकुनेः मरणम्, भीमदुर्योधनयोः गदायुद्धः, दुर्योधनस्य ऊरुभङ्गश्च। |
| १०. | सौप्तिकपर्व | - | दुर्योधनं द्रष्टुं राज्ञाम् आगमनम्। अश्वत्थाम्ना कृपेण- कृतवर्मणा च मिलित्वा रात्रौ पाण्डवान् विहाय अन्येषां उन्मूलनम्। |
| ११. | स्त्रीपर्व | - | धृतराष्ट्रालिङ्गनम् गान्धारीविलापः, शापश्च। |
| १२ | शान्तिपर्व | - | बन्धूनां मरणेन धर्मराजस्य विरक्तिः , शरशय्यायां भीष्मदर्शनम् उपदेशाश्च। |
| १३. | अनुशासनपर्व | - | भीष्मवचनानुसारं धर्मपुत्रस्य धर्मार्थव्यवहाराणां प्रयोगः। भीष्माचार्यस्य स्वर्गारोहणम्। |
| १४. | अश्वमेधपर्व | - | परीक्षित् महाराजस्य जननम्, अश्वमेधयागः। |
| १५. | आश्रमवासपर्व | - | सपरिवारं धृतराष्ट्रस्य वनगमनम्, परमपदप्राप्तिः । |
| १६. | मौसलपर्व | - | यादवकुलनाशप्रतिपादनम्। |
| १७. | महाप्रास्थानिकपर्व | - | राज्यं त्यक्त्वा द्रौपद्या सह पाण्डवानां महाप्रस्थानम्। |
| १८. | स्वर्गारोहणम् | - | नरकवर्णना। धर्मजस्य स्वर्गवासश्च । |

## पाठः ३

# मधुमान् नो वनस्पतिः।

### प्रवर्तनं-१

प्रकृतिसन्तुलने सस्यानां योगदानम् इति विषयम् अधिकृत्य संगोष्ठीं चालयतु।

**सूचनाः**

- प्राणवायुमोचकाः वृक्षाः के ?
- शयनप्रकोष्ठेषु सस्यपरिपालनम् उचितं वा ?
- ओसोण् संरक्षणे सस्यानां स्थानं कीदृशम् ?
- प्रकृतिदुरन्तानाम् आघातं लघ्वीकर्तुं सस्यपरिपालनेन साध्यं वा ?

छात्राः वैयक्तिकरीत्या निर्दिष्टविषये दत्तानि समाहरन्तु। पुनः सङ्घे समाहृतानां दत्तानामवलोकनं कुर्वन्तु। ततः प्रकृतिसन्तुलने सस्यानां योगदानम् इति विषयम् अधिकृत्य संगोष्ठीं चालयतु।

**श्रद्धेयाः अंशाः-**

- सर्वेषां भागभागित्वम्।
- दत्तानां साधुता-औचित्यम्।
- समयावधिः।

पाठः ४

# कनकधारा।

**प्रवर्तनं-१**

**पाठसम्बन्धिनीं कथां स्ववाक्यैः लिखत।**

पाठ्यांशस्य अध्ययनानन्तरं वैयक्तिकरूपेण छात्राः तस्य कथांशः संगृह्य लिखन्तु।

**मूल्यनिर्णयसूचकानि-**

- समग्रता।
- पौर्वापर्यम्।
- विभक्ति-लकारप्रयोगः।
- विशेषण- विशेष्यप्रयोगः।

**आदर्शः**

श्रीशङ्कराचार्यस्य जीवनम् अधिकृत्य माधवविद्यारण्यस्वामिना विरचितं महाकाव्यं भवति शङ्करदिग्विजयः। गुरुकुलवासी शङ्करः एकदा सतीर्थ्यैः सह भिक्षार्थं प्रतिगृहम् अटति स्म। तदन्तरे ते किञ्चिदेकं ब्राह्मणगृहं प्रविशति। गृहस्य पुरतः तिष्ठन्तं वटुवर्यं गृहिणी भक्तिपुरस्सरम् एवं वदति भवादृशेषु श्रेष्ठेष्वस्मादृशानां सपर्या श्रेष्ठेति कथ्यते। तथापि दारिद्र्यात् भिक्षादानाय अत्र किमपि नास्ति। अतः स्वं जन्म निरर्थकमिति गृहिणी खेदमनुभवति। एवं सकरुणं वदन्ती सा माता अन्ते तस्मै ब्रह्मचारिणे शुष्कम् आमलकमेकम् अदात्। तदानीं शङ्करः तां प्रति करुणार्द्रहृदयः अभवत्। तस्य कुटुम्बस्य दारिद्र्यनिवृत्तये मधुरोदारवचनैः ऐश्वर्यदेवतां लक्ष्मीं तुष्टाव। स्तवेनानेन संतुष्टा कमला तु कनकामलकैः तद्भवनं पूर्णमकरोत्। शङ्करस्तु स्वाध्ययनपूर्तये यथापूर्वं गुरुसमीपमगच्छत्।

## अधिकविस्तरः

### शङ्कराचार्येण रचिताः ग्रन्थाः

श्रीशङ्कराचार्यस्य कृतयः भाष्यं, प्रकरणं,स्तोत्रमिति त्रिधा विभक्ताः। भगवद्गीता, ब्रह्मसूत्रम् , दशोपनिषत् इत्येतानि प्रस्थानत्रयमिति व्यवह्रियन्ते।

| **भाष्यम्** | **प्रकरणम्** | **स्तोत्रम्।** |
|---|---|---|
| प्रस्थानत्रयम् | विवेकचूडामणिः | भज गोविन्दम्। |
| (भगवद्गीता, | आत्मबोधः | सौन्दर्यलहरी। |
| ब्रह्मसूत्रम् , | उपदेशसाहस्री | कनकधारास्तवम्। |
| दशोपनिषत् ) | | शिवानन्दलहरी। |

Books on Sri Sankaracharya

| | | |
|---|---|---|
| 1. | आत्मतीर्थम् - Life &Teachings of Sree Sankara . | Ramana CharanaTirtha<br>Nochur Venkataraman. |
| 2. | Adi Sankaracharya-Hinduism's Greatest Thinker. | Pavan K Varma |
| 3. | Adi Sankaracharya: the voice of vedanta. | Sridevi Rao |
| 4 | You are the suprem light -<br>life lessons from Adi Sankaracharya | Nanditha Krishna |
| 5. | Sri Sankaracharya life & Philosophy | |
| 6. | Adi Sankaracharya- The Jagadguru (His life &Philosophy) | |
| 7. | Sankaracharya. | Sita Nath Datta |
| 8. | Jagadguru Sri Sankaracharya. | Deen Dayal Upadhyaya |
| 9. | Jagadguru Adi Sankaracharya. | Sivadas Pandey |
| 10. | In the life of the self Adi Sankaracharya<br>and the yoga of Non dualism | Alistair shearer |

## पाठः - ५

# जयन्ति ते सुकृतिनः।

**प्रवर्तनं-१**

**खण्डिकां पठित्वा अधोदत्तं जीवनचरितरूपरेखां पूरयत।**



केरलगान्धी इति प्रथितः महानुभावः भवति के. केलप्पन् महोदयः। तस्य पूर्णनाम कोयप्पल्लि केलप्पन् नायर् इति । १८८९ तमे वर्षे ओगस्ट् मासस्य २४ दिनाङ्के कोषिक्कोट् जिल्लायां जनिमलभत। गान्धिमार्गानुयायी अयं प्रमुखः स्वातन्त्र्यसंग्रामप्रवर्तकः, चिन्तकः च आसीत्। प्रसिद्धस्य गुरुवायूर् सत्याग्रहस्य नायकः अपि आसीत् अयं महाशयः। १९७१ तमे ओक्टोबर् मासस्य सप्तमे दिने एषः महानुभावः दिवंगतः।

| | | | |
|---|---|---|---|
| नाम | - | ........................................ | । |
| जननम् | - | ........................................ | । |
| प्रशस्तिः | - | ........................................ | । |
| कर्मक्षेत्रम् | - | ........................................ | । |
| दिवङ्गतः | - | ........................................ | । |

पाठः - ६

# रागसुधारस ........।

**प्रवर्तनम्-१**

त्यागराजस्वामिनः इदानींतनकलाकाराणां च कलाजीवितस्य तुलनं कृत्वा चर्चां कुर्वन्तु छात्राः।

**चर्चासूचकाः**

- त्यागराजः उञ्छवृत्तिश्च।
- संगीतोपासना जीवितोपाधिः नासीत्
- दारिद्र्येऽपि न प्रलोभितः ।
- संगीतपठनं जीवनोपाधिः।
- प्रशस्तिः धनार्जनं इत्यादीनां प्रामुख्यम्।

छात्राः वैयक्तिकरीत्या निर्दिष्टविषये दत्तानि समाहरन्तु। पुनः समाहृतानां दत्तानामपग्रथनं सङ्घे कुर्वन्तु। ततः विषयम् अधिकृत्य संगोष्ठीं चालयतु।

**श्रद्धेयाः अंशाः-**

- सर्वेषां भागभागित्वम्।
- दत्तानां साधुता-औचित्यम्।
- समयावधिः।

पाठः ७

# काव्यमुक्तावलिः।

## अधिकविस्तरः

**एवं वादिनि देवर्षौ** - इत्यस्य प्रकरणम् -

प्रणम्य शितिकण्ठाय विबुधास्तदनन्तरम्।
चरणौ रञ्जयन्त्वस्याश्चूडामणिमरीचिभिः।। ६-८१

उमा वधूर्भवान्दाता याचितार इमे वयम्।
वरः शम्भुरलं ह्येष त्वत्कुलोद्भूतये विधिः।। ६-८२

अस्तोतुः स्तूयमानस्य वन्द्यस्यानन्यवन्दिनः।
सुतासम्बन्धविधिना भव विश्वगुरोर्गुरुः।। ६-८३

**पञ्चमहाकाव्यानि।**

| पञ्चमहाकाव्यानि | सर्गाः | प्रमुखानि कानिचन कथापात्राणि |
|---|---|---|
| कुमारसम्भवम् | १७ | पार्वतीपरमेश्वरौ |
| किरातार्जुनीयम् | १८ | पाञ्चाली , पाण्डवाः |
| रघुवंशम् | १९ | सीतारामौ |
| शिशुपालवधम् (माघम्) | २० | श्रीकृष्णशिशुपालौ |
| नैषधीयचरितम् | २१ | नलदमयन्त्यौ |

पाठः - ८

# शिवास्ते सन्तु पन्थानः।

## आमुखम्

मानविकतायाः यथातथचित्रीकरणं कालिदासकृतिषु द्रष्टुं शक्यते। न केवलं मनुष्यकथाप्रतिपादकानि अपि तु सकलचराचराणां कथाप्रतिपादकानि भवन्ति अस्य काव्यानि। अयम् अभिज्ञानशाकुन्तलं, मालविकाग्निमित्रं, विक्रमोर्वशीयम् इति नाटकत्रयं, कुमारसम्भवं, रघुवंशमिति महाकाव्यद्वयं, मेघदूतं, ऋतुसंहार इति खण्डकाव्यद्वयं च व्यरचयत्।

## पठनाधिगमाः

- नाटकांशं भावानुसारं वाचयति।
- सम्बोधनपदानि विविच्य लिखति।
- अव्ययानि वाक्ये प्रयुङ्क्ते।
- कथापात्राणां स्वभाववैशिष्ट्यमधिकृत्य चर्चां कृत्वा टिप्पणीं लिखति।
- आस्वादनटिप्पणीं लिखति।
- सूचनानुसारं पटकथां रचयति।

## मूल्यानि / मनोभावाः।

⟹ काव्यनाटकादिभ्यः उपलभ्यमानानि मूल्यानि उत्तमजीवितोपकारकाणि।

⟹ स्नेहबन्धस्य दृढता

⟹ स्त्रीधर्मः

## पठनोपकरणानि।

अभिज्ञानशाकुन्तलस्य निर्दिष्टांशः।

संस्कृतरूपकाणां सान्द्रमुद्रिका।

## पाठापग्रथनम्।

शीर्षकम्- **शिवास्ते सन्तु पन्थानः।**

दुष्यन्तराजधानीं प्रस्थितां शकुन्तलां प्रति कण्वमहर्षेः आशीर्वचनमिदम्। शकुन्तलायाः यात्रामार्गाः कल्याणदायकाः भवन्तु इत्यर्थः।

अभिज्ञानशाकुन्तलस्य नाटकस्य चतुर्थेऽङ्के वर्णिता कथा अत्र प्रस्तूयते। मृगयानिमित्तं कण्वतपोवनं प्रविष्टः दुष्यन्तः आश्रमवासिनीं शकुन्तलां गान्धर्वविधिना परिणीय आश्रमपरिसर एव वसन्नवर्तत। तन्मध्ये राज्यकार्यबाहुल्यात् दुष्यन्तः स्वराजधानीं प्रत्यगच्छत्। विरहिणी शकुन्तला दुष्यन्तमेव विचितयन्ती कर्मान्तरविमुखा आश्रमे एव कालमनयत्।

शकुन्तलायाः विवाहादिकं सर्वं वृत्तान्तम् अवगम्य महर्षिः कण्वः मुनिजनैः सह तां पतिगृहं प्रैषयत्। तदानीम् अनुगमनाय नियुक्तं शार्ङ्गरवं तथा पतिगृहवासमिच्छन्तीं शकुन्तलां च कण्वः उदात्तवचोभिः उपदिशति। तदा कन्यकाभ्याम् अनसूयाप्रियंवदाभ्यां प्रदत्तः उपदेशः आत्मतुष्टिपोषकं कण्वचिन्तनं च नाटकमिदम् अत्युत्कृष्टपदवीम् नयति। कण्वेनोक्तानि इमानि वचांसि सार्वकालिकप्रसक्तानि भवन्ति।

राज्ञे दुष्यन्ताय उपदिष्टं कण्ववचनं लौकिकानां गृहस्थानां प्रवृत्तिं स्मारयति। यथा

**अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मन-**
**स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम्।**
**सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया**
**भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः।।.** इति।

पतिधर्मम् उद्बोधयितुं वाक्यमिदं पर्याप्तमेव। पतिगृहप्राप्त्यनन्तरं कीदृशः व्यवहारः युवतीभिः आचरणीयः इति

**शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने**
**भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गम।**
**भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी**
**यान्त्येवं गृहिणीपदं युवतयो वामा कुलस्याधयः ।।**

इत्यनेन श्लोकेन प्रतिपाद्यते। शकुन्तलामनुगन्तुम् इच्छन्तौ प्रियसख्यौ अनसूयाप्रियंवदे **किं वा मां नानुगच्छतः** इति शकुन्तलावचनं पुरस्कृत्य महर्षिणा कण्वेन दत्तमुत्तरं तत्कालीनां सामाजिकव्यवस्थितिमवगन्तुं सहायकमेव । तथा राज्यं पुत्रे समर्प्य भर्त्रा दुष्यन्तेन सह कालान्तरे पुनरपि आश्रममिमं प्रत्यागच्छ इति कण्ववचनं कुटुम्बभद्रतायाः दर्शनं बोधयति। परकीयं धनमिव बहुकालं परिपालितां कन्याम् अर्हाय पुरुषाय प्रत्यर्पितवानित्येवम् आश्वसन् कण्वः गृहस्थ इव आत्महर्षमनुभवति। एवं महदुपदेशस्वीकारेण पतिगृहं

प्रस्थिता शकुन्तला उत्तमगृहिणीपदेच्छया तथा स्ववासस्थानपरित्यागव्यथया च शाङ्र्गरव- शारद्वतगौतमीभिः सह अगच्छत्।

## पठनप्रवर्तनानि।

### प्रवर्तनम् १

**श्रवणम् / भावानुसारवाचनम्**

पाठभागश्रवणार्थं पुनः भावानुसारवाचनार्थं च ऐ.सि.टि द्वारा अध्यापकेन छात्रेण वा एकवारं पाठभागः श्राव्यः।

### प्रवर्तनम् २

**नूतनपदचयनम्**

नूतनपदानि चित्वा टिप्पणिपुस्तिकायां पदम् अर्थः च अकारादिक्रमेण लेखनीयम्।

### प्रवर्तनम् ३

**पदच्छेदः**

पाठात् संश्लिष्टपदानि चित्वा पदच्छेदः करणीयः।

**उदा-** क) शिवास्ते शिवाः + ते

.............. .............

.............. .............

### प्रवर्तनम् ४

**सम्बोधनरूपाणि विविच्य पट्टिकाकरणम्।**

पाठभागात् सम्बोधनरूपाणि विविच्य लेखनीया।

उदा- **भगवन्!** दूरमधिरूढस्सविता।

### प्रवर्तनम् ५

**अव्ययानि वाक्ये प्रयुङ्क्ते।**

क्त्वान्त-ल्यबन्त-तुमुन्नन्तानि तथा अन्यानि अव्ययानि च चित्वा वाक्यरचना करणीया।

**उदा-** शकुन्तलां **विलोक्य** कण्वः वदति।

.............     .............

.............     .............

**प्रवर्तनम् ६**

**नाटकांशं सम्यक् पठित्वा कथारूपेण संक्षिप्य लेखनीयः ।**

**श्रद्धेयाः अंशाः**

- आशयसंग्रहः ।
- उचितपदस्वीकारः ।
- भाषाशुद्धिः ।
- कथाशैली।

## आदर्शः

## कथासंक्षेपः

कण्वमहर्षिणा पुत्रीवत् पालिता शकुन्तला आश्रमवृत्तिषु व्यापृता भूत्वा अनसूयाप्रियंवदादिभिः तापसबन्धुभिः सह कण्वाश्रमे वसति। तदन्तरे मृगयाविनोदतत्परः पुरुवंशराजः दुष्यन्तः यदृच्छया कण्वाश्रमं प्रविशति। मुनेः कण्वस्य असान्निध्ये अतिथिपूजनाय नियुक्ता शकुन्तला तं राजानं यथाविधि पूजयति। परस्परदर्शनमात्रेण प्रणयपरवशावुभौ गान्धर्वेण विधिना परिणीतौ अभवताम्। कतिपयदिनानन्तरं स्वकर्मबाहुल्यात् राजा आश्रमात् प्रतिनिवृत्तवान्। शकुन्तला तु पत्युः आगमनविलम्बात् विरहिता सती कर्मान्तरविमुखा सञ्जाता। तन्मध्ये दुर्वाससं प्रति शकुन्तलायाः अबोधपूर्वः अनादरः, तेन कृतः शापः, अनसूयाप्रियंवदयोः अभ्यर्थनां पुरस्कृत्य शापपरिहारश्च अङ्केऽस्मिन् प्रतिपादयति।

तीर्थयात्रानन्तरं प्रतिनिवृत्तः कण्वमहर्षिः पुत्रीसंबद्धं सर्वं विज्ञाय अचिरादेव तां भर्तृगृहं प्रेषयितुं निश्चिनोति। तदर्थं शाङ्र्गरव- शारद्वत- गौतमी इति तापसाः तेन नियुक्ताश्च। गृहस्थः इव मनोव्यथया चिन्तामग्नः कण्वः शाङ्र्गरवे महनीयं दौत्यं योजयति। शाङ्र्गरव ! वाच्यस्त्वया मद्वचनात् स राजा दुष्यन्तः- यत् संयमधनान् अस्मान् तथा भवतः कुलं च विचिन्त्य तथा परस्परानुरागेण संभूतमुभयोः प्रणयञ्च सम्यगवधार्य मत्पुत्र्यै शकुन्तलायै भवतः राजभवने हृदि च अर्हं स्थानं कल्पनीयमिति। ततः परं तस्याः भाग्यनिमित्तमिति च जानाम्यहम् इत्येवं पतिधर्ममुद्बोधयन् कण्वः श्रेष्ठगृहस्थधर्मं प्रकटयति। तद्वदेव स्वगृहं परित्यज्य भर्तृगृहं गच्छन्त्यै पुत्र्यै दत्तः उपदेशः अपि सार्वकालिक प्रसक्त एव। कथमुत्तमगृहिणीपदं प्राप्तुं शक्यते इति सौम्यदीप्तवचसा पित्रा कण्वेनोपदिश्यते।

यथा-

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गम।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामा कुलस्याधयः ।।

भर्तृगृहं प्रस्थितया शकुन्तलया प्रियसख्योः अनसूयाप्रियंवदयोः प्रतिनिवृत्तिमुद्दिश्य पृष्टे सति कण्वेन दत्तं प्रतिवचनं तत्कालिक्याः समाजरीतेः निदर्शनं भवति। **इमेऽपि प्रदेये। न युक्तमनयोस्तत्र गमन**मिति तेनोच्यते। बहुकालं यावत् आश्रमजीवजालैः तापसबन्धुभिः सह उषित्वा देशान्तरं प्रस्थितुमुद्यता सा शकुन्तला- **कदा नु भूयस्तपोवनं प्रेक्षिष्ये** इति सखेदं कण्वं पृच्छति। वर्षेभ्यः परं धीरे पुत्रे राज्यभारं सर्वं निक्षिप्य भर्त्रा दुष्यन्तेन सार्धं शान्ते पुनराश्रमेऽस्मिन् पदं करिष्यसि इति सान्त्वनवचनं कुटुम्बभद्रतायाः महासन्देशम् उद्घोषयति। अन्ते, शकुन्तलायाः गमनात्परं दुःखसन्तप्ते सख्यौ समाश्वासयन् कण्वः स्वीयम् उत्तरदायित्वं सगौरवं निरवहदिति आत्मतोषम् अनुभवति। तदेवं वर्ण्यते कालिदासेन -

अर्थो हि कन्या परकीय एव
तामद्य सम्प्रेष्य परिग्रहीतुः।
जातो ममायं विशदप्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा ।।... इति।

शिवास्ते सन्तु पन्थानः (ते जीवितयात्रामार्गाः कल्याणदायकाः भवन्तु) इति शुभाशिषं मनसा आदाय गौतमीशाङ्र्गरवशारद्वतमिश्रैः सह शकुन्तला पतिगृहं प्रस्थिता।

**प्रवर्तनं -७**

**कथापात्रचित्रणम्**

**नाटकांशं सम्यग् पठित्वाकथापात्राणां स्वभावः कीदृश इति निरूपयत।**

**श्रद्धेयाः अंशाः**

- चर्चा
- कथापात्रस्वभावावगमनम् ।
- उचितपदस्वीकारः ।
- भाषाशुद्धिः ।

**कण्वमहर्षिः।**

कालिदासकविप्रतिभायां विकासं प्राप्य विश्वेषु सर्वत्र सुगन्धं प्रसार्य विराजमानं साहित्यकुसुमं भवति अभिज्ञानशाकुन्तलं नाम नाटकम्। सप्तसु अङ्केषु ग्रथितस्यास्य चतुर्थोऽङ्कः काव्यास्वादकानां सहृदयानां मनांसि हठादाकर्षति। अङ्केऽस्मिन् प्रधानपात्रं भवति महर्षिः कण्वः।

तीर्थयात्रां समाप्य प्रत्यागतं कण्वं चिन्तामग्न इव अवतार्यते कालिदासेन चतुर्थेऽङ्के। शकुन्तलावल्लभः दुष्यन्तः युक्तवचोभिः कथम् आदरणीयः इत्यासीत् महर्षेः चिन्ता इति ततः अवगन्तुं शक्यते। सहसैव शाङ्र्गरवम् आहूय एवमवदत् - अस्मान् संयमधनान् विचिन्त्य, तथा आत्मनः कुलं श्रेष्ठमिति चावबुद्ध्य परस्परानुरागनिमित्तं गान्धर्वं गणयित्वा पत्नीषु शकुन्तलापि परिगणनीया शेषं वधूबन्धुभिः अवाच्यमिति। वचनमिदं  सारवत् सकलकालप्रसक्तं च भवति।

वनौकसोऽपि सन्तः लोकज्ञाः वयम् इति कण्ववचनं सार्थकमेवेति शकुन्तलायै दत्तात् उपदेशादवगन्तुं शक्यते- यथा

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गम।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामा कुलस्याधयः ।।

इति उपदेशः इदानीमपि पतिगृहगमनोद्युक्ताभिः युवतीभिः प्रत्यक्षरम् आचरणीयः। सामाजिकमूल्यं गृहस्थस्योत्तरदायित्वं च कण्वमहर्षिणा कथमुद्घोषितमित्यस्य दृष्टान्तोऽपि चतुर्थे अङ्के दृश्यते। इत एव किं प्रियसख्यौ निवर्तिष्येते इति वचनं पुरस्कृत्य कण्वेनोक्तं वचः अतिप्रसक्तमेव यत्- **इमेऽपि प्रदेये। न युक्तमनयोस्तत्र गमनम्। त्वया सह गौतमी यास्यति-** इति। वचनमिदम् नाधिकविस्तरमर्हति।

एतावत्कालं स्नेहसौहार्दादिकं अनुभूय प्रसार्य च उषितम् इममाश्रमं कदा भूयोऽपि प्रेक्षिष्ये इति शकुन्तलायाः आशङ्काम् अतिप्रौढवचसा कण्वः दूरीकरोति। वर्षेभ्यः परं समर्थे पुत्रे राज्यभारं निक्षिप्य भर्त्रा दुष्यन्तेन सह पुनरपि इममाश्रमं प्रविश इति। वचनमिदं कुटुम्बभद्रतां सम्यग् जानतः कण्वस्य सदुपदेश एव। शिवास्ते सन्तु पन्थानः इत्याशिषा पुत्रीं भर्तृगृहं प्रेषमाणः कण्वः उत्तमगृहस्थस्य उत्तरदायित्वसाधकः लोकज्ञ एव इति अर्थो हि कन्या .......... इति वचनेन अपि बोधयति।

## शकुन्तला

अभिज्ञानशाकुन्तले नाटके कालिदासवचसा परिलसिता मुग्धनायिका शकुन्तला विश्वमित्रमेनकयोः पुत्री भवति । एषा कण्वाश्रमपरिसरे पितृभिः परित्यक्ता । शकुन्तैः (पक्षिविशेषैः) लालिताम् इमां दृष्ट्वा करुणार्द्रचित्तः कण्वः आदाय शकुन्तलेति नाम्ना स्वपुत्रीवत् पर्यपालयत्। आश्रमे उषित्वा वनराजीः वन्यमृगान् पुष्पलतादींश्च सा मातृधर्मेण परिपालितवती।

मृगयार्थम् आश्रममागतेन दुष्यन्तमहाराजेन सह गान्धर्वविधिना परिणीता सा दुष्यन्तविरहेण अतीव दुःखिता चासीत्। ततः कण्वमहर्षिः तां भर्तृगृहं प्रेषयितुं निश्चितवान्। तदानीं तया अनुभूताः मानसिकव्यथाः हृदयहारिण्या भाषया कालिदासेन प्रस्तूयन्ते। दुष्यन्तराजभवनं गन्तुमुद्युक्ता शकुन्तला कण्वमुनेरुपदेशेन प्रसन्नहृदया

सञ्जाता। किन्तु इष्टदेशं इष्टबान्धवान् च परित्यज्य अन्यदेशवासः तस्यै बहुखेददायकः आसीत्। प्रियसख्योः अनसूयाप्रियंवदयोः परित्यागः ताम् अस्वस्थचित्ताम् अकरोत् इति वचनादस्मादवगन्तुं शक्यते। यथा- **तात! इत एव किं प्रियसख्यौ निवर्तिष्येते** इति। यद्यपि दुष्यन्तविरहस्त्वतीव दुःखमजनयत्, ततोऽपि आश्रमपरित्यागदुःखं ताम् अधिकं व्यथयति स्म। इमां वस्तुताम् अस्याः वाक्यादवगन्तुं शक्यते- "तात! कदा नु भूयस्तपोवनं प्रेक्षिष्ये इति" इष्टबन्धुजनैः सह प्रस्थिता सा भूयो भूयः आश्रममेवावलोकयन्तीति कविवाक्यं शकुन्तलायाः स्नेहभावं सम्यगवगन्तुं सहायकमेव।

**प्रवर्तनं -७**

अधो निर्दिष्टान् नाटकसन्दर्भान् अधिकृत्य चर्चां कृत्वा आस्वादनटीकां लिखत।

१. शकुन्तलाविरहितं शून्यमिव तपोवनं प्रविशावः।

२. प्रत्यर्पितन्यास इवान्तरात्मा।

## १. शकुन्तलाविरहितं शून्यमिव तपोवनं प्रविशावः।

कालिदासः संस्कृतमहाकविषु प्रातः स्मरणीयः भवति। कालिदासमहाकवेः उपमाप्रयोगचातुरीम् अधिकृत्य उपमा कालिदासस्य इति प्रथा प्रशस्यते। अत्रापि तादृशमेकं वर्णनं द्रष्टुं शक्यते।

पुत्रीवात्सल्यम् अनुभूय तथा पुत्रीवात्सल्यं प्रदाय च कण्वाश्रमे वसन्ती शकुन्तला स्नेहस्य उदात्तनिदर्शनत्वेन विराजते। अत एव प्रथमदर्शनेनैव राज्ञि दुष्यन्ते सा अनुरक्ता बभूव। विवाहात्परं स्वराजधानीं प्रतिनिवृत्तं दुष्यन्तं स्मृत्वैव महादुःखं चानुभवति। पुत्रीसंबन्धं वृत्तान्तं सर्वं विज्ञाय कण्वमहर्षि तां पतिगृहं प्रैषयत्। ततः परं शकुन्तलायाः सान्निध्यरहितं तपोवनं शोकाकुलं प्रतिभाति। तत् दृष्ट्वा शकुन्तलायाः प्रियसख्यौ अनसूयाप्रियंवदे स्वाभिप्रायं प्रकटयतः यद् **शकुन्तलाविरहितं शून्यमिव तपोवनं प्रविशावः इति।** वस्तुतः एवमनुमातुं शक्यते- आश्रमस्यास्य सर्वतोषप्रदायिनी आसीत् शकुन्तलेति।

## २. प्रत्यर्पितन्यास इवान्तरात्मा।

अभिज्ञानशाकुन्तले पितृस्नेहस्य मूर्तरूपेण वर्णितः भवति महर्षिः कण्वः। चतुर्थेऽङ्के अस्य सान्निध्यम् अनिवार्यमेव। लौकिकजीवने समग्रः सूक्ष्मः च स्नेहभावः तस्य प्राधान्यं च कालिदासवचोभिः ऋषिवर्ये कण्वे सन्निवेश्यते। यज्ञकर्मसु निमग्नो भूत्वा ऋषिजीवनं नीतवतस्तस्य मनसि मानविकतायाः भावाः स्पष्टं विराजन्ते। तत्तु कण्ववचनेनैव प्रतिपाद्यते- **वनौकसोऽपि सन्तः लोकज्ञाः वयम्** इति। अस्मादृशानां लौकिकानां मार्गदीप इवाभाति कण्वः। शकुन्तलायाः पतिगेहप्रेषणसमये स एवं वदति, यथा

अर्थो हि कन्या परकीय एव  तामद्य सम्प्रेष्य परिग्रहीतुः।

जातो ममायं विशदप्रकामं  प्रत्यर्पितन्यास इवान्तरात्मा ।। इति।

वस्तुतस्तु पुत्री परकीया भवति। परकीयं धनमिव बहुकालं परिपालितां कन्याम् अर्हाय पुरुषाय प्रत्यर्पितवान् इत्येवम् आश्वसन् कण्वः गृहस्थ इव आत्महर्षमनुभवति।

**प्रवर्तनम् ६**

**कथांशं पठित्वा पटकथालेखनम्।**

छात्राः पाठपुस्तके विद्यमानाः अन्याः कथाः पठन्तु। ताः कथाः आधारीकृत्य पटकथारचनायै तान् प्रेरयन्तु।

**(आदर्शपटकथा)**

**शिवास्ते सन्तु पन्थानः**

दृश्यं-१

(महर्षेः कण्वस्याश्रमः।आश्रमाङ्कणे चिन्तामग्नः कण्वः इतस्ततः सञ्चरति। चिन्तामग्नस्य तस्य मुखस्य समीपस्थं दृश्यम्। आत्मगतरूपेण तस्य विचाराः प्रतिफलन्ति)

किं नु खलु तत्रभवतो दुष्यन्तस्य युक्तवचोभिः सन्देष्टव्यम्।

(इतस्ततः चलति। निर्णीतम् इव शार्ङ्गरवमाह्वयते)

| | |
|---|---|
| कण्वः | वत्स ! शाङ्र्गरव। |

(शाङ्र्गरवः आगच्छति, कण्वं प्रणमति।)

| | |
|---|---|
| शाङ्र्गरवः | धन्यात्मन् ! अहमस्मि। |
| कण्वः | वत्स ! एवं त्वया मद्वचनात् स राजा दुष्यन्तः शकुन्तलां पुरस्कृत्य वक्तव्यः। |
| शाङ्र्गरवः | आज्ञापयतु भवान्। |
| कण्वः | अस्मान् संयमधनान् साधु विचिन्त्य, भवतः कुलम् उन्नतम् इति चावगम्य शकुन्तलादुष्यन्तयोः (युवयोः)स्नेहप्रवृत्तिः बन्धुजनप्रेरणारहिता इति च विचार्य शकुन्तलायै अर्हं स्थानं दातव्यम्। अतः परं वधूजनकथनानर्हं पुत्रीभाग्यमेव खलु ? |
| शाङ्र्गरवः | गृहीतः सन्देशः। |

**दृश्यं-२**

(पुनः कण्वः शकुन्तलासमीपं गच्छति, तस्यै अपि सदुपचारम् उपदिशति। समीपे गौतमी, शाङ्र्गरवः, अनसूयाप्रियंवदा, शारद्वतश्च तिष्ठन्ति। कण्वः शकुन्तलां प्रतिवदति।)

कण्वः — वत्से! त्वमिदानीमनुशासनीयासि। वनौकसोऽपि सन्तः लोकज्ञाः वयम्।

शाङ्र्गरवः भगवन्! न खलु धीमतां कश्चिदविषयो नाम।

**दृश्यं-३**

अञ्जलीबद्धायाः शकुन्तलायाः पार्श्वस्थं दृश्यम्)

कण्वः — वत्से! त्वं पतिगृहं प्राप्य-

(शकुन्तला सश्रद्धं शृणोति गौतम्यादयश्च शृण्वन्ति।)

गुरून् यथार्हं पूजय, राज्ञः इतरेषु दारेषु प्रियसखीवृत्तिं भज। भर्त्रा अनादृता अपि प्रतिकूलभावं मा कुरु, सेवकेषु उदारशीला भव, ऐश्वर्यलाभेषु गर्विष्ठा मा भव, युवतयस्तु एवं प्रकारेण उत्तमगृहिणीपदं प्राप्नुवन्ति। एतद्विरुद्धम् आचरन्त्यः वंशस्य दोषकारिण्यः भवन्ति।

(शकुन्तलायाः प्रतिवचनम्)

शकुन्तला — अवगतं मया।

**दृश्यं-४**

(कण्वः गौतमीं प्रति)

कण्वः — कथं वा गौतमी मन्यते?

(काषायवस्त्रधारिणी पलिता गौतमी कण्वं प्रणम्य वदति। कण्वाश्रमस्य मध्यदूरदृश्यम्। हरिणशावकाः तत्र तत्र चरन्ति।)

गौतमी — एतावान् वधूजनस्योपदेशः।

(गौतमी शकुन्तलां प्रति वदति)

गौतमी — जाते एतत्सर्वम् अवधारय।

**दृश्यं-५**

(शकुन्तला गौतमीम् आश्लिष्यति। गौतमी तां

सान्त्वयति। शकुन्तलां गन्तुं संप्रेरयन् कण्वः अनसूयां प्रियंवदां च आश्रमाभिमुखं गमनाय निर्दिशति। तदा- शकुन्तला-)

| | |
|---|---|
| शकुन्तला | तात! इत एव किं प्रियसख्यौ निवर्तिष्येते? |
| कण्वः | वत्से! इमेऽपि प्रदेये। न युक्तमनयोस्तत्र गमनम्। त्वया सह गौतमी यास्यति। |

**दृश्यं-६**

(गौतमी शकुन्तलायाः समीपं गत्वा पुनः गन्तुं प्रेरयति। शाङ्र्गरवः कण्वमुपेत्य सूचयति)

| | |
|---|---|
| शाङ्र्गरवः | भगवन्! दूरमधिरूढः सविता। तत्त्वरय तत्रभवतीम्। |

**दृश्यं-७**

(गमनं नाटयन्ती शकुन्तला आश्रमाभिमुखी भूत्वा सविलापं कण्वसमीपं गच्छति। कण्वस्तु अतिदुःखमनुभवति तत् न प्रकटयति।

| | |
|---|---|
| शकुन्तला (कण्वमाश्लिष्य) | तात! कदा नु भूयस्तपोवनं प्रेक्षिष्ये? |

(शकुन्तला रोदिति। तद्दृष्ट्वा अन्येऽपि शोकाकुलाः भवन्ति।अर्धभक्षितदर्भकबलाः हरिणाः शकुन्तलामेव पश्यन्तः तिष्ठन्ति। वृक्षेभ्यः अश्रूणीव लताः पतन्ति। एकनिमेषं सर्वे निश्चलं निशब्दं तिष्ठन्ति। निश्शब्दतां भेदयन् कण्वः शकुन्तलां वदति।

| | |
|---|---|
| कण्वः | श्रूयताम्। जाते! चतुरन्तमहीसपत्न्याः (चतसृषु दिक्षु व्याप्तायाः भूमेः सपत्नी भूत्वा)भूभारम् अप्रतिरथे दुष्यन्तपुत्रे समर्प्य भर्त्रा साकं पुनरपीदम् आश्रमपद मागच्छतु। खेदं त्यज। शिवास्ते सन्तु पन्थानः। |

**दृश्यं-८**

(वामहस्तेन शकुन्तलामाश्लिष्य दक्षिणहस्तं पुरः प्रसार्य)

कण्वः गच्छ वत्से।

(पुरो गच्छन्ती शकुन्तला अतिक्रान्तमाश्रमं, तातं प्रियसख्यौ, वनराजीः,आश्रममृगान् च मध्ये मध्ये पश्यति। नेत्राम्बूनि विसृज्य परिमृज्य च असहनीयव्यथया एकैकं पदं विलम्बयति। तां शकुन्तलां विलोक्य)

सख्यौ हा धिक्! हा धिक्! अन्तर्हिता शकुन्तला वनराजिभिः।

(उभावपि शकुन्तलाविरहेण रुदतः। कण्वस्तु तां हस्ताभ्यां समालिङ्ग्य सनिश्वासं वदति)

कण्वः अनसूये! प्रियंवदे! गता वां सहचरीं, निगृह्य शोकं मामनुगच्छतम्।

**दृश्यं-९**

(अनसूया प्रियंवदे दुःखं नियम्य)

उभे तात! शकुन्तलाविरहितं शून्यमिव तपोवनं प्रविशावः

(कण्वः हस्ताभ्याम् उभौ लालयन् सान्त्वयन् च)

कण्वः स्नेहप्रवृत्तिरेवं दर्शिनी। हन्त! भोः शकुन्तलां पतिगृहं विसृज्य लब्धमिदानीं स्वास्थ्यम्।

(शकुन्तलाविरहितदुःखं उपशाम्य, आत्मबलं हर्षं च ना टयन् सधैर्यमेवं वदति।

न्यासवस्तु इव पालितां पुत्रीं सुरक्षितरूपेण उचितपुरुषाय समर्प्य महान्तम् आत्मतोषम् अनुभवामि। वस्तुतः कन्या परधनमेव, तस्याः समुचिते पात्रे अर्पणं महान् क्लेशश्च। तदर्पणे तु मनः प्रसन्नतां याति।

( कण्वः अनसूयाप्रियंवदे च कृतकृत्याः आश्रमकुटीरं प्रविशन्ति।)

## अधिकविस्तरः

**श्लोकचतुष्टयम्**

१ यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठस्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लब्यं मम तावदीदृशमहो स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः।।

२ पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्याः भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।।

३ अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मन-
स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम्।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः।।

४ शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गम।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ।।

**अमरकोशः**

| | | |
|---|---|---|
| भार्या | - | भार्या जायाथ पुंभूम्नि दाराः ,स्यात्तु कुटुम्बिनी। |
| तनयः | - | आत्मजस्तनयः सूनुः पुत्रः स्त्रियां त्वमी। |
| वधूः | - | स्त्रीयोषिदबला योषा नारी सीमन्तिनी वधूः। |
| पतिः | - | धवः प्रियः पतिर्भर्ता। |

एककम् - संस्कृतिः

## पाठः - ९

# ईशोपदेशः ।

**अधिकप्रवर्तनम्-१**

**केरलीयानां संस्कृतकवीनां तेषां काव्यानाञ्च पट्टिका करणीया।**

**श्रद्धेयाः अंशाः**

- कवीनां नाम ।
- काव्यनाम ।
- विभागः ।

| | |
|---|---|
| श्रीकृष्णविलासम् | सुकुमारकविः |
| श्रीकृष्णविजयम् | शङ्करकविः |
| सुमङ्गलीचरितम् | मानविक्रम एट्टन् तम्पुरान् |
| संगीतचन्द्रिका | आट्टूर् कृष्णपिषारोटि |
| सन्तानगोपालम् | कटत्तनाट्ट लक्ष्मिक्कुट्टितम्पुराट्टि |
| राघवीयम् | रामपाणिवादः |
| रघूदयः | श्रीकण्ठः |

पाठः - १०

# प्राप्य वरान् निबोधत।

**अधिकविस्तरः**

**दशोपनिषदः**

**ईश केन कठ प्रश्न मुण्ड माण्डूक्य तित्तिरि।**

**ऐतरेयं च छान्दोग्यं बृहदारण्यकं क्रमात्।।**

**गद्योपनिषदः**

| | |
|---|---|
| ऐतरयोपनिषत् | ऋग्वेदः |
| बृहदारण्यकोपनिषत् | यजुर्वेदः |
| तैत्तिरीयोपनिषत् | यजुर्वेदः |
| केनोपनिषत् | सामवेदः |
| छान्दोग्योपनिषत् | सामवेदः |
| माण्डूक्योपनिषत् | अथर्ववेदः |

**पद्योपनिषदः**

| | |
|---|---|
| ईशोपनिषत् | यजुर्वेदः |
| कठोपनिषत् | यजुर्वेदः |
| मुण्डकोपनिषत् | अथर्ववेदः |
| प्रश्नोपनिषत् | अथर्ववेदः |

## ध्येयवाक्यानि

| | |
|---|---|
| प्रज्ञानं ब्रह्म | ऐतरेयोपनिषत् |
| तत्त्वमसि | छान्दोग्योपनिषत् |
| अयमात्मा ब्रह्म | माण्डूक्योपनिषत्, |
| अयमात्मा ब्रह्म | बृहदारण्यकोपनिषत् |
| असतो मा सद्गमय | बृहदारण्यकोपनिषत् |
| तमसो मा ज्योतिर्गमय | बृहदारण्यकोपनिषत् |
| मृत्योर्मा अमृतं गमय | बृहदारण्यकोपनिषत् |
| अहं ब्रह्मास्मि | बृहदारण्यकोपनिषत् |
| उदारचरितानां तु वसुधैव कुटुम्बकम् | महोपनिषत् |
| सत्यं वद,धर्मं चर | तैत्तिरीयोपनिषत् |
| मातृदेवो भव, पितृदेवो भव | तैत्तिरीयोपनिषत् |
| आचार्यदेवो भव, अतिथिदेवो भव | तैत्तिरीयोपनिषत् |

# वार्षिकासूत्रणम्

## दशमी कक्ष्या

| मासः | एककम् | पाठस्य नाम | व्यवहाररूपम् | कालांशः |
|---|---|---|---|---|
| June | I जीवनम् | १ आयुरारोग्यसौख्यम्। | सुभाषितानि। | १० |
| July | | २ दीनवत्सला जननी। | कथा। | १० |
| | | ३ मधुमान् नो वनस्पतिः | विवरणम्। | १५ |
| August | II पैतृकम् | ४ कनकधारा। | काव्यम्। | १५ |
| पादवार्षिकमूल्यनिर्णयः | | | | |
| September | II पैतृकम् | ५ जयन्ति ते सुकृतिनः। | जीवचरितम्। | १५ |
| October | III साहिती | ६ रागसुधारस.....। | विवरणम्। | १५ |
| November | | ७ काव्यमुक्तावलिः। | काव्यम्। | १२ |
| December | | ८ शिवास्ते सन्तु पन्थानः | नाटकम्। | ०८ |
| अर्धवार्षिकमूल्यनिर्णयः | | | | |
| January | IV संस्कृतिः | ९ ईशोपदेशः।(काव्यम्) | विवरणम् । | १५ |
| February | | १० प्राप्य वरान् निबोधत। | उपनिषत्। | १५ |
| March | वार्षिकमूल्यनिर्णयः | | | |